अष्टाविंशतिनामानि, त्रिकालं तु हि यः पठेत्।
प्रकर्षश्रद्धयायुक्तो, मूको वाचस्पतिर्भवेत्॥५॥
महामन्त्रमयानां च, महानाम्नां प्रकीर्तनात्।
महाप्रज्ञामवाप्नोति, नात्र कार्या विचारणा॥६॥
पुष्यनक्षत्रमारभ्य, दशवारं पठेन्नरः।
पुष्यनक्षत्रपर्यन्ताश्वत्थमूले दिने दिने॥७॥
पुरश्चरणमात्रेण सर्वपापैः प्रमुच्यते।

[इति श्रीरुद्रयामलरहस्ये प्रज्ञावर्द्धनस्तोत्रं सम्पूर्णम्।]

आरूढा सरस्वती स्तोत्र

प्रार्थना एवं प्रणति के पद्य

आरूढा श्वेतहंसैर्भ्रमति च गगने दक्षिणे चाक्षसूत्रं,
वामे हस्ते च दिव्याम्बरकनकमयं पुस्तकं ज्ञानगम्यम्।
सा वीणां वादयन्ती स्वकरजपैः शास्त्र-विज्ञानशब्दैः,
क्रीडन्ती दिव्यरूपा करकमलधराभारती सुप्रसन्ना॥१॥

श्वेतपद्मासना देवी श्वेतगन्धानुलेपना।
सा च तैर्मुनिभिः सर्वैर्ऋषिभिः स्तूयते सदा ॥२॥
या कुन्देदुतुषारहारधवला या शुभ्रवस्त्रावृता,
या वीणा वरदण्डमण्डितकरा या श्वेत पद्मासना॥
या ब्रह्माच्युतशंकरप्रभृतिर्देवैः सदा वन्दिता,
सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा ॥३॥
शुक्लां ब्रह्मविचारसारपरमामाद्यां जगद्व्यापिनीं,
वीणा-पुस्तकधारिणीमभयदां जाड्यान्धकारापहाम्॥
हस्ते स्फाटिकमालिकां विदधतीं पद्मासने संस्थितां,
वन्दे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम् ॥४॥

बीजमन्त्रगर्भित स्तुति

ह्लीं ह्लीं हृद्यैकबीजे शशिरुचिकमले कल्पविस्पष्टशोभे,
भव्ये भव्यानुकूले कुमतिवनदवे विश्ववन्द्याङ्घ्रिपद्मे।
पद्मे पद्मोपविष्टे प्रणतजनमनोमोदसम्पादयित्रि,
प्रोत्फुल्लज्ञानकूटे हरिनिजदयिते देवि संसारसारे ॥५॥
ऐं ऐं ऐं दृष्टमन्त्रे कमलभवमुखाम्भोजभूते स्वरूपे,
रूपारूपप्रकाशे सकलगुणमये निर्गुणे निर्विकारे।
न स्थूले नैव सूक्ष्मेऽप्यविदितविभवे नापि विज्ञानतत्त्वे,
विश्वे विश्वान्तराले सुरवरनमिते निष्कले नित्यशुद्धे ॥६॥
ह्लीं ह्लीं ह्लीं जाप्यतुष्टे हिमरुचिमुकुटे वल्लकीव्यग्रहस्ते,
मातर्मातर्नमस्ते दह दह जडतां देहि बुद्धिं प्रशस्ताम्।
विद्ये वेदान्तवेद्ये परिणतपठिते मोक्षदे मुक्तिमार्गे,
मार्गातीतस्वरूपे भव मम वरदा शारदे शुभ्रहारे ॥७॥
धीं धीं धीं धारणाख्ये धृतिमतिनतिभिर्नामभिः कीर्तनीये,
नित्ये नित्ये निमित्ते मुनिगणनमिते नूतने वै पुराणे।
पुण्ये पुण्यप्रवाहे हरिहरनमिते नित्यशुद्धे सुवर्णे,
मातर्मात्रार्धतत्त्वे मतिमतिमतिदे माधव-प्रीतिमोदे ॥८॥
ह्लूं ह्लूं ह्लूं स्वस्वरूपे दह दह दुरितं पुस्तकव्यग्रहस्ते,
सन्तुष्टाकारचित्ते स्मितमुखि सुभगे जृम्भिणि स्तम्भविद्ये।
मोहे मुग्धप्रवाहे कुरु मम विमतिध्वान्तविध्वंसमीड्ये,
गीर्वाग्गीर्वाग्भारति त्वं कविवररसनासिद्धिदे सिद्धिसाध्ये ॥९॥

आत्मनिवेदन

स्तौमि त्वां त्वां च वन्दे मम खलु रसनां नो कदाचित्त्येजेथा,
मा मे बुद्धिर्विरुद्धा भवतु न च मनो देवि मे यातु पापम्।
मा मे दु:खं कदाचित्क्वचिदपि विषयेऽप्यस्तु मे नाकुलत्वम्,
शास्त्रे वादे कवित्वे प्रसरतु मम धीर्मास्तु कुण्ठा कदापि ॥१०॥
इत्येतै: श्लोकमुख्यै: प्रतिदिनमुषसि स्तौति यो भक्तिनम्रो,
वाणीं वाचस्पतेरप्यविदितविभवो वाक्पटुमृष्टकण्ठ:।
या स्यादिष्टार्थलाभै: सुतमिव सततं वर्धते सा च देवी,
सौभाग्यं तस्य लोके प्रभवति कविता विघ्नमस्तं प्रयाति ॥११॥
निर्विघ्नं तस्य विद्या प्रभवति सततं चाश्रुतग्रन्थबोध:,
कीर्तिस्त्रैलोक्यमध्ये निवसति वदने शारदा तस्य साक्षात्।
दीर्घायुर्लोकपूज्य: सकलगुणनिधि: सन्ततं राजमान्यो,
वाग्देव्या: सम्प्रसादात्त्रिजगति विजयी सत्सभासु प्रपूज्य: ॥१२॥

फलश्रुति

ब्रह्मचारी व्रती मौनी त्रयोदश्यां निरामिष:।
सारस्वतो जन: पाठात्सकृदिष्टार्थलाभवान् ॥१३॥
पक्षद्वये त्रयोदश्यामेकविंशतिसङ्ख्यया।
अविच्छिन्न: पठेद्धीमान् ध्यात्वा देवीं सरस्वतीम् ॥१४॥
सर्वपापविनिर्मुक्त: सुभगो लोकविश्रुत:।
वांछितं फलमाप्नोति लोके ऽस्मिन्नात्र संशय: ॥१५॥
ब्रह्मणेति स्वयं प्रोक्तं सरस्वत्या: स्तवं शुभम्।
प्रयत्नेन पठेन्नित्य सोऽमृतत्वाय कल्पते ॥१६॥

यह स्तोत्र अत्यन्त लाभप्रद है। बाल्यकाल से ही इसका पाठ बालकों द्वारा करवाने की परम्परा है। इसका नित्य पाठ करते रहने से बुद्धि तीव्र होती है, स्मृति-शक्ति बनी रहती है, प्रतिभा का विकास होता है तथा दोनों पखवाड़ों की त्रयोदशी को इसके २१ पाठ करने से वांछित फल की प्राप्ति होती है।

श्रीचामुण्डा[1] स्तोत्रम् (नवार्ण मन्त्र-गर्भित)

ऐं बीजं परमात्मनिःश्वसितभूवेदादिवर्णात्मकं,
ये भक्त्या मनसा जपन्ति परमं तेषां सुवाक्ज्ञानदाम्।
अम्बां मद्धृदयाम्बरस्थपरचिद्रूपामनन्तास्पदां,
चामुण्डामहमानतोऽस्मि वरदां सर्वार्थसंसिद्धये॥१॥
ह्रींकाराम्बररंगनर्तनकरीमोंकारलक्ष्यां परा-
मोंकारात्मकवर्णलक्ष्यविभवामाकारहीनां शिवाम्।
साकारां वरदाभयाङ्कुशमहापाशान् करैर्बिभ्रतीं,
चामुण्डामहमानतोऽस्मि वरदां सर्वार्थसंसिद्धये॥२॥
क्लींकाराख्यमहामर्णि रतिपतिः प्राप्यांगहीनः परं,
ग्रीवापादविहीनकोऽपि मदनो यस्याः प्रसादान्मुदा।
त्रीन् लोकान् कुसुमेषुभिर्विजितवान् तां वेदसारात्मिकां,
चामुण्डामहमानतोऽस्मि वरदां सर्वार्थसंसिद्धये॥३॥
चार्वङ्गीमतिसुन्दरीमभयदामम्भोजमध्यस्थितां,
चार्वङ्गीकृतगानवाद्यरसिकां शास्त्राद्यवाच्याकृतिम्।
चार्वाकादिसमस्तशास्त्रनिवहप्रोक्तादिशक्त्यात्मिकां,
चामुण्डामहमानतोऽस्मि वरदां सर्वार्थसंसिद्धये॥४॥
मुण्डाद्यैः सुरशत्रुभिः कृतमहाकष्टापदां नाशिनीं,
मुण्डप्रोतसुमाल्यशोभितगलां मुक्तिप्रदस्वाङ्घ्रिकाम्।
मूढैर्ज्ञानविहीनकैः पशुनिभैर्ज्ञातुं त्वशक्यां जनैः,
चामुण्डामहमानतोऽस्मि वरदां सर्वार्थसंसिद्धये॥५॥
डामर्यादिसमस्तभूतनिवहैः सेव्यां सदानन्ददां,
डाकिन्यादिसुयोगिनीपरिलसत् षट्चक्रसंचारिणीम्।

---

१. यहां 'चामुण्डा' पद का अर्थ इस प्रकार किया गया है—
चमू अज्ञानकार्यसेनां वियदादिसमूहरूपां डाति डलयोरैक्यात्।
लाति आदत्ते स्वात्मसाक्षात्कारेण नाशयति इति **चामुण्डा**॥
अर्थात् अज्ञान कर्मरूप तथा आकाशादि समूह रूप जो सेना है उसे अपने आत्मसाक्षात्कार के द्वारा नष्ट करने वाली।

डम्भोपेतजनैः कृताचंनविधौ सन्तुष्टिहीनान्तरां,
चामुण्डामहमानतोऽस्मि वरदां सर्वार्थसंसिद्धये ॥६॥
यैर्लोभाद् विहितोऽन्नदानरहितो यज्ञः सगर्वं जनै-
स्तेषामन्तकरूपिणीमरिभयानर्थप्रदात्री रुषा।
यैर्भक्त्या स्तुतिपूजनादि रचितं तेषामभीष्टार्थदां,
चामुण्डामहमानतोऽस्मि वरदां सर्वार्थसंसिद्धये ॥७॥
विद्वद्वृन्दकृतार्चनस्तुतिनुतिप्रीतां विधिप्रार्थितां,
विद्वद्वृन्दसुपूजनादिकरणे सन्तुष्टचित्तां सदा।
विद्यां वीरनुताम्बुजाङ्घ्रियुगलां वीरापवर्गप्रदां,
चामुण्डामहमानतोऽस्मि वरदां सर्वार्थसंसिद्धये ॥८॥
चेतोम्भोजविहारिणीं मम मनः प्रोद्भूतभीहारिणीं,
चेतोऽतीतपदस्थितां वरचिदानन्दाकृतिं शान्तिदाम्।
चेतोवृत्त्यनुसारिकर्मफलदां चिन्तामणिं श्रीकरीं,
चामुण्डामहमानतोऽस्मि वरदां सर्वार्थसंसिद्धये ॥९॥
श्रीशान्ताचलनायकाम्बुजपदासक्तस्वचित्तैः सदा,
श्रीशान्त्यादिगुणान्वितैर्वरचिदानन्दाख्यनाथात्मभिः ।
दत्तात्मामृतपानमत्तहृदयानन्तस्य वक्त्रोद्भवं,
शान्तिं शं शममातनोतु पठतां स्तोत्रं महानन्ददम् ॥१०॥

रुद्रयामलोक्त 'यक्षिणी-कल्प' के प्रयोग

(१) यक्षिणी-परिचय

यक्षों की गणना देव-योनि विशेष में की जाती है। इनकी जाति का प्रधान अधिपति 'कुबेर' है। कुबेर शिवजी के मित्र, इन्द्र की निधियों के भण्डारी, धन के अधिदेवता आदि अनेक रूपों में मान्य है। कुबेर की प्रजा में यक्ष और यक्षिणियां भी स्वतन्त्र सत्ता-सम्पन्न एवं साधकों की कामना-पूर्ति करने वाली हैं। यक्षिणी वस्तुतः तो कुबेर की पत्नी के रूप में प्रधान देवी है और भगवती दुर्गा के समान ही अनन्त शक्ति सम्पन्न मानी जाती है। कुबेर के सेवक यक्ष और उनकी महारानी की सेविकाएं अथवा परिवार देवियां यक्षिणियां भी देव-देवियों के समान उपास्य हैं। ये उपासित होकर साधकों की सभी कामनाएं पूर्ण करती हैं।

यक्षिणियां कितनी हैं ? यह कहना कठिन है; किन्तु रुद्रयामल के **'यक्षिणी-कल्प'** के अनुसार निम्नलिखित यक्षिणियों की साधना सर्वसुलभ मानी गई है—

१. विद्यायक्षिणी,	२. कुबेर यक्षिणी,
३. जनरंजिनी,	४. चन्द्रिका,
५. घण्टाकर्णी,	६. शङ्खिनी,
७. कालकर्णी,	८. विशाखा,
९. मदना,	१०. श्मशानी,
११. महामाया,	१२. भिक्षिणी,
१३. माहेन्द्री,	१४. विकला,
१५. कपालिनी,	१६. सुलोचना,
१७. पद्मिनी,	१८. कामेश्वरी,
१९. मानिनी,	२०. शतपत्रिका,
२१. मदन मेखला	२२. प्रमदा,
२३. विलासिनी,	२४. मनोहरा
२५. अनुरागिनी	२६. चन्द्रद्रवा,
२७. विभ्रमा,	२८. वटवासिनी,
२९. सुरसुन्दरी, और	३०. कनकावती।

इन यक्षिणियों के अतिरिक्त वनस्पति में निवास करने वाली यक्षिणियां भी अनेक हैं जिनकी साधना उन वनस्पतियों में ही की जाती है। उनमें प्रमुख हैं—

१. बिल्व-यक्षिणी,	२. निर्गुण्डी०,
३. अर्क०,	४. श्वेत गुंजा,
५. तुलसी०,	६. कुश०,
७. पिप्पल०,	८. आम्र०,
९. उदुम्बर०,	१०. अपामार्ग०,
११. धात्री०,	१२. सहदेवी०,
१३. पलाश०,	१४. बदरी०,
१५. स्नुही०,	१६. पुनर्नवा०,
१७. निम्निणी०,	१८. निम्ब०,
१९. कुमारी०	२०. शंखपुष्पी आदि।

इनके अतिरिक्त 'वन्दा' के पौधों की भी यक्षिणियां हैं। यह बन्दा एक प्रकार का पौधा होता है, जो किसी दूसरे पेड़ पर उगकर उसका रस पीते हुए बढ़ता है। ऐसे कतिपय चमत्कारी बन्दों के प्रयोग भी यक्ष-यक्षिणी के मन्त्रों से किए जाते हैं।[1]

२. प्रत्येक यक्षिणी के मन्त्रों का संग्रह

उपर्युक्त यक्षिणियों के नाम और मन्त्र इस प्रकार हैं—

१. **विद्यायक्षिणी**—ह्रीं वेदमातृभ्यः स्वाहा।

२. **कुबेर यक्षिणी**—ॐ कुबेर यक्षिण्यै धनधान्यस्वामिन्यै धन-धान्य समृद्धि मे देहि दापय स्वाहा।

३. **जनरञ्जिनी यक्षिणी**—ॐ क्लीं जनरंजिनि स्वाहा।

४. **चन्द्रिका यक्षिणी**—ॐ ह्रीं चन्द्रिके हंसः क्लीं स्वाहा।

५. **घण्टाकर्णी यक्षिणी**—ॐ पुरं क्षोभय भगवति गम्भीर स्वरे क्लैं स्वाहा।

६. **शङ्खिनी यक्षिणी**—ॐ शङ्खधारिणि शङ्खाभरणे ह्रां ह्रीं क्लीं क्लीं श्रीं स्वाहा।

७. **कालकर्णी यक्षिणी**—ॐ क्लौं कालकर्णिके ठः ठः स्वाहा।

८. **विशाला यक्षिणी**—ॐ ऐं विशाले ह्रां ह्रीं क्लीं स्वाहा।

९. **मदना यक्षिणी**—ॐ मदने मदने देवि मामालिगय संगं देहि देहि श्रीः स्वाहा।

१०. **श्मशानीं यक्षिणी**—ॐ हूं ह्रीं स्फूं श्मशानवासिनि श्मशाने स्वाहा।

११. **महामाया यक्षिणी**—ॐ ह्रीं महामाये हुं फट् स्वाहा।

१२. **भिक्षिणी यक्षिणी**—ॐ ऐं महानादे भिक्षिणि ह्रां ह्रीं स्वाहा।

१३. **माहेन्द्री यक्षिणी**—ॐ ऐं क्लीं ऐन्द्रि माहेन्द्रि कुलुकुलु चुलुचुलु हंसः स्वाहा।

१४. **विकला यक्षिणी**—ॐ विकले ऐं ह्रीं श्रीं क्लैं स्वाहा।

१५. **कपालिनी यक्षिणी**—ॐ ऐं कपालिनि ह्रां ह्रीं क्लीं क्लैं क्लौं हससकल ह्रीं फट् स्वाहा।

---

१. हमारे द्वारा लिखित 'तन्त्र-शक्ति' ग्रन्थ में 'वनस्पति-तन्त्र' प्रकरण में इनकी विधि दी गई है। वहीं देखें।

१६. **सुलोचना यक्षिणी**—ॐ क्लीं सुलोचने देवि स्वाहा।

१७. **पद्मिनी यक्षिणी**—ॐ ह्रीं आगच्छ पद्मिनि वल्लभे स्वाहा।

१८. **कामेश्वरी यक्षिणी**—ॐ ह्रीं आगच्छ कामेश्वरि स्वाहा।

१९. **मानिनी यक्षिणी**—ॐ ऐं मानिनि ह्रीं एहि एहि सुन्दरि हस हसमिह संगमिह स्वाहा।

२०. **शतपत्रिका यक्षिणी**—ॐ ह्रां शतपत्रिके ह्रां ह्रीं श्रीं स्वाहा।

२१. **मदन मेखला यक्षिणी**—ॐ क्रों मदनमेखले नमः स्वाहा।

२२. **प्रमदा यक्षिणी**—ॐ ह्रीं प्रमदे स्वाहा।

२३. **विलासिनी यक्षिणी**—ॐ विरूपाक्षविलासिनि आगच्छागच्छ ह्रीं प्रिया मे भव प्रिया मे भव क्लैं स्वाहा।

२४. **मनोहरा यक्षिणी**—ॐ ह्रीं आगच्छ मनोहरे स्वाहा।

२५. **अनुरागिणी यक्षिणी**—ॐ ह्रीं आगच्छानुरागिणि मैथुनप्रिये स्वाहा।

२६. **चन्द्रद्रवा यक्षिणी**—ॐ ह्रीं नमश्चन्द्रद्रवे कर्णाकर्णकारणे स्वाहा।

२७. **विभ्रमा यक्षिणी**—ॐ ह्रीं विभ्रमरूपे विभ्रमं कुरु कुरु एहि एहि भगवति स्वाहा।

२८. **वट यक्षिणी**—ॐ एहि एहि यक्षि यक्षि महायक्षि वटवृक्ष निवासिनि शीघ्रं मे सर्वं सौख्यं कुरु कुरु स्वाहा।

२९. **सुरसुन्दरी यक्षिणी**—ॐ आगच्छ सुरसुन्दरि स्वाहा।

३०. **कनकावती यक्षिणी**—ॐ कनकावति मैथुनप्रिये स्वाहा।

वनस्पति-वासिनी यक्षिणियां

१. **बिल्व यक्षिणी**—ॐ क्लीं ह्रीं ऐं ॐ श्रीं महायक्षिण्यै सर्वैश्वर्यप्रदात्र्यै ॐ नमः श्रीं क्लीं ऐं आं स्वाहा। (ऐश्वर्य-प्राप्ति)

२. **निर्गुण्डी यक्षिणी**—ॐ ऐं सरस्वत्यै नमः। (विद्यालाभ)

३. **अर्क यक्षिणी**—ॐ ऐं महायक्षिण्यै सर्वकार्यसाधनं कुरु कुरु कुरु स्वाहा। (सर्वकार्य साधन)

४. **श्वेतगुञ्जा यक्षिणी**—ॐ जगन्मात्रे नमः। (सन्तुष्टि)

५. **तुलसी यक्षिणी**—ॐ क्लॉं क्लीं तुलस्यै नमः। (राज्यसुख)
६. **कुशयक्षिणी**—ॐ वाङ्मयायै नमः। (वाक्सिद्धि)
७. **पिप्पल यक्षिणी**—ॐ ऐं क्लीं मे धनं कुरु कुरु स्वाहा।
(धन लाभ)
८. **आम्र यक्षिणी**—ॐ ह्रीं ह्रीं ह्रूं पुत्रं देहि देहि स्वाहा।
(पुत्रप्रद)
९. **उदुम्बर यक्षिणी**—ॐ ह्रीं श्रीं शारदायै नमः। (विद्याप्राप्ति)
१०. **अपामार्ग यक्षिणी**—ॐ ह्रीं भारत्यै नमः। (ज्ञानप्राप्ति)
११. **धात्रीयक्षिणी**—ऐं क्लीं नमः। (अशुभ निवारण)
१२. **सहदेवीयक्षिणी**—ॐ नमो भगवति सहदेवि सद्बलदायिनी सद्देववत् कुरु कुरु स्वाहा।

साधना-प्रकार—इसी प्रकार यक्षिणियों के भी मन्त्र भिन्न हैं। बन्दों के मन्त्र भी प्राप्त होते हैं। 'अष्टसिद्धि' और 'दत्तात्रेय-तन्त्र' में भी इस विषय को पल्लवित किया गया है। इन यक्षिणियों की साधना में काल की प्रधानता है और स्थान का भी महत्त्व है। जिस ऋतु में जिस वनस्पति का विकास हो वही ऋतु इनकी साधना में लेनी चाहिये। वसन्त ऋतु को सर्वोत्तम माना गया है। दूसरा पक्ष श्रावण मास (वर्षा ऋतु) का है। स्थान की दृष्टि से एकान्त अथवा सिद्धपीठ कामरूया आदि उत्तम कहे गये हैं। साधक को उक्त साध्य वनस्पति की छाया में निकट बैठकर उस यक्षिणी के दर्शन की उत्सुकता रखते हुए एक मास तक मन्त्रजप करने से सिद्धि प्राप्त होती है।

साधना से पूर्व आषाढ़ की पूर्णिमा को क्षौरादि कर्म करके शुभ मुहूर्त में बिल्वपत्र के नीचे बैठकर शिव को षोडशोपचार पूजा करे तथा 'रुद्राभिषेक' पूर्वक त्र्यम्बक मन्त्र के ५ हजार जप करे और पूरे श्रावण मास में इसी तरह पूजा-जप के साथ प्रति दिन कुबेर की पूजा करके निम्नलिखित कुबेर मन्त्र का १०८ जप करे—

ॐ यक्षराज नमस्तुभ्यं शङ्कर प्रिय बान्धव।
एकां मे वशगां नित्यं यक्षिणीं कुरु ते नमः॥

इसके पश्चात् अभीष्ट यक्षिणी के मन्त्र का जप करे। ब्रह्मचर्य और हविष्यान्न भक्षण आदि नियमों का पालन आवश्यक है। प्रति दिन कुमारी-पूजन करे और जप के समय बलि नैवेद्य पास रखे। जब यक्षिणी

मांगे तब वह अर्पित करे। वर मांगने की कहने पर यथोचित वर मांगे। द्रव्य-प्राप्त होने पर उसे शुभ कार्य में ही खर्च करे।

यह विषय अति रहस्यमय है। सत्र की बलि सामग्री, जप संख्या, जप-माला आदि भिन्न-भिन्न हैं। अतः किसी योग्य साधक गुरु की देख-रेख में पूरी विधि जानकर साधना करें। क्योंकि यक्षिणी देवियां अनेक रूप में दर्शन देती हैं उससे भय भी होता है।

रुद्रयामल दर्शित रसकल्प और उसके प्रयोग

'रुद्रयामल' की विशेषताओं में एक विशेषता यह भी है कि इसमें रस से सम्बद्ध अनेक वस्तुओं के कल्पों का भी विस्तार से कथन हुआ है। वर्तमान 'केमेस्ट्री' के सन्दर्भ में प्राचीन शास्त्रों का कितना योगदान है? यह समझने के लिए हमें 'रुद्रयामल' के एक भाग **'रसकल्प'** का अवलोकन करना चाहिए। इसी प्रकार एक अन्य संग्रह ग्रन्थ हमें प्राप्त है जिसे रुद्रयामलान्तर्गत **'धातुमञ्जरी'** कहा गया है। इन दोनों ग्रन्थों का परिशीलन करने से ज्ञात होता है कि—तन्त्रज्ञ विद्वान् तान्त्रिक कर्मों की सिद्धि के लिये—'आत्मरक्षा एवं उपयुक्त सामग्री-साधन भी अत्यावश्यक मानते हैं।

प्राचीन महर्षि सुदृढ़ शरीर, द्वन्द्व सहिष्णु, नीरोग, दीर्घायु एवं पूर्ण परिश्रमी होते थे। तभी वे दीर्घकालिक कठोर से कठोर तप—अनुष्ठान करने से पीछे नहीं हटते थे। योग-साधना से जिस प्रकार वे शारीरिक बल और आध्यात्मिक चिन्तन पर दृढ़ रहते थे, उसी प्रकार विभिन्न चिकित्साशास्त्रीय रसायनादि के सेवन से स्वस्थ और दीर्घ-जीवी बने रहते थे। उनकी आयु हजारों वर्षों की होती थी और वे सैकड़ों वर्ष एक स्थिति में रहकर क्षुधा-तृषा से मुक्त होकर साधना में लीन रहते थे। इसका मुख्य कारण रसायन-सेवन ही था।

(क) **रसकल्प संग्रह का परिचय**—प्रस्तुत 'रस-कल्प' में—"पारद—मारणविधि, महारस, रस, उपरसः ४ प्रकार का गन्धक, अनेक प्रकार की सौराष्ट्री-फिटकरी, ३ प्रकार के कासिस,—(पुष्प कासिस, हारकासिस सहित), दो प्रकार के गैरिक, सुवर्ण मारने के विड—(नौसादर चूलिक, लवण, गन्धक, चित्रार्द्रभस्म और गोमूत्र के योग से), ताम्रसत्त्व, रसक सत्त्व (जस्ता) आदि के प्रयोग दिखलाये हैं।

'धातु-मञ्जरी'-संग्रह का परिचय—रुद्रयामल के अन्तर्गत धातु सम्बन्धी विषयों का किसी आचार्य ने स्वतंत्र संकलन करके इसे ग्रन्थ-रूप दिया है। इतिहासज्ञ इसे यद्यपि १६वीं शती में संग्रहीत मानते हैं तथापि 'रुद्रयामलान्तर्गत' ऐसा स्पष्ट लिखा होने से इसकी विषय-विवेचना सम्बन्धी प्राचीनता तो सुरक्षित है ही, इसमें महादेव और पार्वती के संवाद के रूप में विषय का प्रतिपादन हुआ है, जिसमें वर्णित कुछ बातें इस प्रकार हैं—

१. **प्रधाना धातवः प्रोक्ता रङ्ग-लोहक-ताम्रकाः।**

रांगा, लोहा और तांबा ये प्रधान धातु कहे गये हैं।

२. **रजतेनैव संयुक्ता धातोरुत्तमता सदा ॥१२॥**

चांदी के साथ संयुक्त होने पर ही धातु की सदा उत्तमता होती है।

३. **मध्यमा सत्त्वजा धातुर्नीचा च त्रपुसीसयोः।**
त्रपुताम्रसंयोगेन जाता धातुश्च मध्यमा ॥१३॥

त्रपु और ताम्र के संयोग से बनने वाली सत्त्वजा धातु मध्यम है। त्रपु और सीसा के योग से बनने वाली धातु निकृष्ट है।

४. **शुल्व-खर्पर-संयोगे जायते पित्तलं शुभम् ॥६३॥**

शुल्व-तांबा और खर्पर—जस्ता के योग से पीतल बनता है।

५. **बङ्ग-ताम्र-संयोगेन जायते तेन कांस्यकम् ॥६५॥**

बंग और तांबे के संयोग से कांसा बनता है।

६. **खर्परैः सह पारदं दिव्यं किञ्चित् प्रमेलयेत्।**
जायते रसको नाम नाना रोगहरो-भवेत् ॥६८॥

जस्ता और पारे के संयोग से 'रसक' बनता है। (वैसे तो रसक और खर्पर दोनों एक ही पदार्थ के नाम हैं किन्तु यह रसक पारे के मेल से बना 'जिंक-एमलगम' उससे विशिष्ट है) यह रसक अनेक रोगों का नाशक है।

७. **नागस्तु रहतेर्हीनो मृतधातुस्तु जायते।**
स एव कोमलाग्निस्थः सिन्दूरं जायते ध्रुवम् ॥६९॥

नाग-सीसा कोमलाग्नि में गरम करने से सिन्दूर में परिणत हो जाता है।

इनके अतिरिक्त यहां सुवर्ण, चांदी, तांबा, जस्ता, रांगा-बंग, सीसा और लोहा—इन धातुओं के शास्त्रीय पर्याय भी दिये हैं।

दाह-जल-तेजाब और तांबे के योग से तूतिया—नीला थोथा बनता है। यह भी यहां वर्णित है। इसी सन्दर्भ में १०० भाग बंग में १ भाग पारद मिलाने से शुद्ध चांदी का निर्माण तथा सीसे और तांबे के संयोग से सोना बनाने का विधान भी इस प्रकार दिया है—

नागस्य सम्भवं ताम्रं मध्ये मेलापनं कृतम्।
विभागे तु कृते तत्र जायते कुम्पिका शुभा ॥६७॥
तन्मध्ये गालयेन्नागं त्रिवारं यत्नपूर्वकम्।
जायते निर्मलं स्वर्णंमुदितं चैव कुम्पिके ॥६८॥

धातुओं की प्राप्ति के स्थानों का उल्लेख भी इस ग्रन्थ की विशिष्टता है। धातुओं को शुद्ध करने की विधि, धातुओं को मृदु बनाना, मृदुता का लोप करना, स्नेह, क्षार, तैल, विष, एवं धातुओं के भेद—कालायस—काला लोहा, ताम्र, कांस्य, सीसा, त्रपु-रांगण, वैक्रान्तक—एक प्रकार का लोहा, आरकूट—पीतल आदि और उनके गुण-धर्मों का परिज्ञान 'धातु-मंजरी' के विषयों में समाविष्ट है।

यामल-तन्त्र के साधक विभिन्न तान्त्रिक उपासनाओं में अपने शरीर की शुद्धि और रोगादि से सुरक्षा हेतु आयुर्वेदीय-रसायन-प्रक्रियाओं से पूर्ण परिचित होते थे, तभी तो दीर्घकाल तक वे साधनाओं को स्वस्थता-पूर्वक सम्पन्न करते थे।

(ख) **'रसार्णव-कल्प' का परिचय**—ऐसे ही अन्य संग्रह **'रस-रत्नाकर'** (श्लो० सं० ५७८) **'रस-हृदय'** (१८ पटल ६७५ पत्रात्मक) तथा **'रसार्णव-कल्प'** के नाम से भी प्राप्त होते हैं। इनमें तान्त्रिक दृष्टि को अपनाते हुए विशेष रूप से **'वनस्पति-कल्प'**, **'औषधि-कल्प'** तथा **'उदक-कल्प'** पर विचार प्रस्तुत किये हैं। आज विज्ञानवेत्ताओं ने विभिन्न परीक्षणों से यह सुसिद्ध कर दिया है कि वृक्ष और उसके अवयव—१. मूल, २. शाखा, ३. पत्र, ४. पुष्प आर ५. फल मानव के लिए अनेक रूप से प्रयोग करने पर वे बहुत उपयोगी होते हैं। आयुर्वेद के प्रणेता महर्षियों ने इन वृक्ष-पंचांगों के माध्यम से ही चिकित्सा-पद्धति का विस्तार किया है जिसे अन्य चिकित्सा-पद्धतियों में साक्षात् ग्रहण

की अपेक्षा उनके सत्त्व, रस, गन्ध आदि की प्रक्रिया अपना कर विशेष विस्तार दिया है।

प्राचीन आचार्यों की यह निश्चित मान्यता थी कि वृक्ष दैवी-शक्ति सम्पन्न हैं और उनकी इस शक्ति को जागृत करने के लिए मन्त्रों के द्वारा उनका अभिमन्त्रण आवश्यक है। यही कारण है कि पवित्र भूमि में बीजों का शुभ मुहूर्त में मन्त्र-जपपूर्वक वपन, सेचन और उपयुक्त स्थिति में उनके किसी भी अंश का ग्रहण करने के लिए तन्त्र-पद्धति के साथ मन्त्र-विधान का आश्रय लेकर सब कार्य किये जाते थे। ऐसे विधान और मन्त्रादि आयुर्वेद के ऋषिप्रणीत ग्रन्थों में उपलब्ध होते हैं।

१. वनस्पति-कल्प

रुद्रयामल के रस-कल्प में 'वनस्पति-कल्प' के अन्तर्गत निम्न-लिखित वनस्पतियों के कल्प दिये हैं—

१. अपराजिता, २. ब्रह्मदण्डी, ३. अश्वगन्धा, ४. मुशली, ५. अस्थिश्रृंखला, ६. ज्योतिष्मती, ७. श्वेतार्क, ८. गन्धक, ९. तालक, १०. रक्तवज्री, ११. उच्चटा, १२. ईश्वरी, १३. तृणज्योति, १४. एक-वीरा, १५. देवदाली (पीत एवं अन्य), १६. कटुतुम्बी, १७. क्षीरकंचुकी, १८. रुदन्ती, १९. नागमण्डल, २९. सोमराजी, २१. ताम्रवन, २२. मयूरगिरि, २३. अंकोलवृक्ष, २४. शाल्मली, २५. बिल्व तथा २६. एरण्ड आदि।

औषधि-कल्प में निम्नलिखित औषधियों के कल्प दिये हैं—

१. लक्ष्मणा, २. करंज, ३. पुनर्नवा, ४. कृष्ण-हरिद्रा, ५. कटु-रोहिणी, ६. अंकोल, ७. काकजंघा, ८. करक, ९. निर्गुण्डी, १०. इन्द्रवारुणी, ११. भृंगराज, १२. त्रिफला, १३. मुण्डी, १४. चित्रक, १५. मण्डूक, १६. लांगली, १७. रक्तगुंजा, १८. मण्डूक-ब्राह्मी, १९. वन्दा, २०. वाचुकी, २१. निम्ब, २२. श्वेतार्क, २३. शुण्ठी, २४. पाठा, २५. भूकन्द तथा २६. शिवलिंगी आदि।

२. **'उदक-कल्प'** में नीचे बताये हुए कल्प निम्नलिखित हैं—

१. शैलोदक, २. विषोदक, ३. चन्द्रोदक, ४. कर्तरिजल, ५. घृतोदक, ६. कृष्णोदक, ७. भू-शैलोदक, ८. दुर्गन्धोदक, ९. खुरसा-जल, १०. उष्णोदक, ११. रक्तोदक, १२. कुष्ठोदक आदि।

आचार्य चरक, सुश्रुत और वाग्भट आदि ने यह स्पष्ट रूप से कहा है कि—देवार्चन एवं अभिमन्त्रण-पूर्वक औषध-सेवन से शीघ्र ही मानसिक और शारीरिक व्याधियां शान्त होती हैं। आयुर्वेद का ही वचन है—

जन्मान्तर-कृतं पापं व्याधि-रूपेण बाधते।
तच्छान्तिरौषधैर्दानैर्जप - होम - सुरार्चनैः ॥

पुराकाल में ऋषि-महर्षि दैवी-शक्तियों से सम्पन्न इन औषधियों से इतनी अधिक आत्मीयता रखते थे कि जीवन के बाह्य कार्य-कलापों के अतिरिक्त आन्तरिक उपासनाओं में भी निरन्तर सहायता प्राप्त करते थे। मन्त्र-साधना में मन्त्राक्षरों की औषधियों से स्नान, भस्म, तिलक, धूप और माला-निर्माण आदि करके मन्त्रसिद्धि करते थे। आज भी कतिपय साधक इनके उपयोग से असाध्यों को साध्य बनाने का सामर्थ्य रखते हैं। उदक-कल्प के प्रयोगों में सूर्य-किरणों का तेजस्तत्त्व प्राप्त करके **अभिमन्त्रण** होने से और भी अधिक लाभ होता है। वृक्षों की पूजा, परिक्रमा, कच्चे सूत से आवरण तथा उनकी छाया में बैठकर मन्त्रजप, भोजन आदि विधान हमारे लौकिक जीवन में बहुत ही गहराई से प्रयुक्त होते हैं, यह सभी जानते हैं। औषधियों का धारण भी महत्त्व रखता ही है। मूलिका जड़, पत्र-पुष्प के प्रयोग सभी रुद्रयामल के रसार्णव-कल्प में विस्तार से दर्शित हैं। इसीलिये हम प्रार्थना करते हैं—

मूले ब्रह्मा त्वचि विष्णुः, शाखासु च महेश्वरः।
पत्रे पत्रे देवनाथो, वृक्षराज! नमोऽस्तु ते॥ इत्यादि।

(ग) पञ्चामरा-योग

योग-सिद्धि प्राप्ति के लिये यौगिक देह बनाना अत्यावश्यक है। जैसे किसी उत्तमोत्तम मेहमान के आने अथवा बुलाने से पूर्व हम उनके योग्य आवास-निवास की पूरी समुचित व्यवस्था करते हैं, उसी प्रकार विभिन्न मलों से दूषित इस शरीर में सर्वातिशायी परमात्मा और उनकी महनीय शक्ति के निवास के लिये योग्य व्यवस्था करना अत्यावश्यक है। आन्तरिक-शुद्धि से पूर्व बाह्य-शुद्धि के लिए रुद्रयामल में **'पञ्चामरा-साधन'** का निर्देश दिया है। इसी में पांच अमर-वस्तु—

१. दूर्वा ग्रन्थियुक्त, २. विजया (भांग), ३. बिल्वपत्र, ४. निर्गुण्डी और ५. काली तुलसी—का प्रयोग होता है। विशेष यह है कि—इनमें विजया के पत्र दुगुने और अन्य चार समान भाग में लेकर उनका पृथक्-पृथक् चूर्ण बना लें तथा उनका मिश्रण करते समय नीचे बताये गये मन्त्रों का एक बार पाठ करें—

१. ॐ त्वं दूर्वेऽमरपूज्ये त्वममृत-समुद्भवे।
अमरं मां सदा भद्रे कुरुष्व नृहरिप्रिये॥

२. ॐ संविदे ब्रह्मसम्भूते ब्रह्मपुत्रि सदाऽनघे।
भैरवाणां च तृप्त्यर्थे पवित्रा भव सर्वदा॥

३. ॐ काव्यसिद्धिकरी-देवी-बिल्वपत्रनिवासिनि।
अमरत्वं सदा देहि शिवतुल्यं कुरुष्व माम्॥

४. ॐ निर्गुण्डि परमानन्दे योगानामधिदेवते।
रक्ष माममरे देवि भावसिद्धिप्रदे नमः॥

५. ॐ विष्णोः प्रिये महामाये महाकालनिवारिणि।
मां सदा रक्ष तुलसि मामेकममरं कुरु॥

फिर सबको मिलाकर—

"ॐ अमृते अमृतोद्भवे अमृतवर्षिणि अमृतमाकर्षयाकर्षय सिद्धि देहि स्वाहा।"

इस मन्त्र से धेनुमुद्रा, योनिमुद्रा तथा मत्स्यमुद्रा दिखाते हुए प्रणाम करें। यही सात बार बिना मन्त्र के गुरुस्मरण पूर्वक तथा सात बार इष्टमन्त्र बोलते हुए प्रत्येक के साथ 'तर्पयामि नमो नमः' जोड़कर तर्पण करने का भी विधान है। इसके पश्चात्—

"ॐ ऐं वद वद वाग्वादिनि मम जिह्वाग्रे स्थिरीभव सर्वसत्त्व वशङ्करि शत्रुकण्ठ त्रिशूलिनि स्वाहा"

इस मन्त्र से चूर्ण का भक्षण करें। इन पांचों वस्तुओं में क्रमशः—गणपति, सरस्वती, शिव, योगिनी तथा विष्णु का निवास होने से ये देवता साधक पर प्रसन्न होकर उसे सिद्धि प्रदान करते हैं। योग-साधकों के लिये १. नेती, २. दन्ती, ३. धौती, ४. नेउली और ५. क्षालिनी के लिये

जो जहां उपदेश किया गया है, वह भी 'पंचामरा-योग' के नाम से निर्दिष्ट है।

इस योग से कुण्डलिनी-जागरण में भी सहयोग प्राप्त होता है।

पञ्च-तिक्त-प्रयोग

रुद्रयामल के जप-सम्बन्धी निर्देशों में यह भी कहा गया है कि—"जो व्यक्ति जप के समय मुख में 'पंच-तिक्त' वस्तुओं—जिनमें '१. इलायची, २. जायफल, ३. कपूर, ४. लौंग तथा ५. जावित्री' हैं, को रखकर देवी-मन्त्रों का जप करता है और भगवती को जप समर्पित करता है उसको मैं समस्त पृथिवी दे देता हूं। अर्थात् उसके लिये कोई वस्तु अदेय नहीं रहती। ऐसे ही अन्यान्य देवताओं के जप में भी कुछ विशिष्ट वस्तुओं के मुख में रखने का निर्देश है। कौल-मार्गियों के लिये ये पंचतिक्त ही 'कौल' हैं क्योंकि ये कुल-वृक्षों से उत्पन्न हैं।'[1]

---

१. यथा—

(क) पंचतिक्तं मुखे क्षिप्त्वा जपं कृत्वा समर्पयेत्।
तस्याहं सकलां पृथ्वीं ददामि पुरुषोत्तम॥
कौलं च पंच तिक्तं स्यात् कौलं कुलसमुद्भवम्।
तस्माद् देयं प्रयत्नेन देव्याश्चोद्भवमिच्छता॥
एला जातीफलं चैव कर्पूरं च लवंगकम्।
जातिपत्रं तथा देवि! पंचतिक्तमिदं प्रियम्॥

(ख) पूजा पद्धतियों में 'ताम्बूलादि-सुरभितवदनः' ऐसा भी कहा गया है। अतः सुगन्धित ताम्बूल भक्षण करके भी देवी-पूजा की जाती है।

एक बात और

'परिचय' और 'प्रयोग' विभागों में वर्णित विषयों के अध्ययन से यह पूर्णतया ज्ञात हो जाता है कि **'रुद्रयामल'** वस्तुतः तन्त्रशास्त्र का विश्वकोश है। इससे जिन-जिन विषयों को हमने सर्वसाधारण पाठकों के लिये उपयोगी एवं करने योग्य प्रयोगों को समझा, उनका यथामति संकलन किया है। प्रयोग-प्रक्रिया की गहनता में हम इसलिए नहीं गये हैं कि वह एक अत्यन्त गम्भीर विषय है, उसकी सूक्ष्मता लेखन मात्र से स्पष्ट नहीं हो सकती। आन्तरिक चक्रों के सूक्ष्मतम अंकनों को बिना चित्रों के कैसे समझाया जा सकता और उनके भिन्न-भिन्न स्थानों पर विराजमान देव, देवियाँ, परिवार देव-देवियां, लोकपाल, क्षेत्रपाल आदि के पूजाविधानों और उनके अन्तर्विधानों में पिरोये हुए मन्त्रों और बीजमन्त्रों की गूड व्यवस्था को प्रत्यक्ष कराने के लिए प्रायोगिक निदर्शन भी उतने ही आवश्यक थे जैसा कि इस उदाहरण से ज्ञात हो सकेगा—

"कण्ठस्थान में विराजित षोडशदल कमल में महामोहनाशिनी भगवती शाकिनी देवी का स्थान है। इस स्थान का जागरण होने पर योगार्थ ज्ञान होता है जिसे रुद्रयामल में 'कण्ठसंचार' कहा गया है। यह कण्ठसंचार क्रिया अन्य विभिन्न क्रियाओं से ओत-प्रोत है। भगवान् रुद्र ने इसके लिए पूछा है कि—मुझे कण्ठसंचार और उससे सम्बद्ध क्रियाओं का ज्ञान दो। तब, उस प्रसंग से 'राक्षसी क्रिया, रिपुविद्वेषी, मंगलोदय, विनयाह्लाद, कालसाधन, नवीनता, ध्यान कुलपीठसाधन, कुण्डली-साधन, साधककुल, वर्णध्यान, दलभेद, स्फूर्तिविद्यावियोग, पूर्वज्ञान-समोदय, समरसप्राप्ति, काय-कल्प, कामदेव मन्थन, देहव्यवस्थिति तथा भावज्ञान" आदि की ज्ञान-प्राप्ति के भी प्रश्न उपस्थित किये हैं और दयामयी माता ने अत्यन्त विस्तार से इन्हें समझाया है। यथा—

कण्ठ में षोडशदल है, उसके मध्य में कर्णिकामण्डल है, उसके बाहर एक चतुरस्र और अन्दर कर्णिका में एक षट्कोण है। पुनः बाहर चार द्वारों से शोभित एक नौखण्डी गृह है जो भूबिम्बषट्क से स्थित है। वहीं ऊपर चांदनी छाई हुई है ओर वहां मधुपुरी है जो कि कर्णिका में

है, उसके मध्य में आठ पुरियों का प्रकाश है जो कि कौलक्रिया साधन की सिद्धि के लिये है। (देखें पटल ६४ तथा पद्य-१६ से २६) यहां पूर्वादि दिशाओं में प्रेमकलाधिनाथ आठ देव विराजित हैं जो अपने-अपने गृहों की रक्षा करते हुए कण्ठगत षोडशदल कमल को प्रकाशित करते हैं। इस कमल के मध्य में मनोन्मनीनाथ सर्वोत्तम मणिजटित मन्दिर है और उस मन्दिर के सभी दिक्कोणों में वामा-ज्येष्ठा आदि शक्तियां स्थित हैं जिनके स्वरूप और मन्त्रों का स्मरण कर अर्चन किया जाता है। चूंकि ये शक्तियां योगिमातारूप हैं और योगिमुख्यों से समन्वित हैं अतः उनका भी स्मरण होता है। मध्य में मनोन्मनी का पूजन किया जाता है। इनकी पूजा-सामग्री मनः कल्पित होती है, कुछ द्रव्य साक्षात् कल्पित भी होते हैं। यह क्रिया करने पर साकिनी देवी के दर्शन प्राप्त होते हैं।" आदि।

यह एक क्रिया का निदर्शन है। उपर्युक्त प्रश्नों के अनुसार सभी क्रियाएं कैसे सम्पन्न की जाती हैं इसका वर्णन भी वहां दिया है।

इस विवरण से रुद्रयामलीय साधना-विषयों की गम्भीरता आंकी जा सकती है। इसीलिये हमने सार-संग्रह को ही इस ग्रन्थ में प्राथमिकता दी है और उससे सम्बद्ध प्रक्रियाओं को यहां स्पष्ट और सरल रूप में संकलित किया है।

फिर भी कुछ साधक त्वरित फल प्राप्ति के लिए साधना के दुष्कर मार्ग का अवलम्बन न कर सरल से सरलतम मार्ग अपनाना चाहते हैं। ऐसे साधकों के लिए यहां कुछ संक्षिप्त स्तोत्र एवं प्रयोग-विधान संक्षिप्त व सरल ढंग से प्रस्तुत किए जा रहे हैं। जो साधक शीघ्र फलकामी हों और साधना की गहनता में न पड़ना चाहते हों, उनके लिए इन पृष्ठों में ऐसी सामग्री देने का प्रयास किया जा रहा है, जिनके नित्य प्रति पाठ मात्र से भी मनोरथ पूर्ति सम्भव है। ये स्तोत्रादि **'रुद्रयामल'** तन्त्र से ही यहां दिए जा रहे हैं।

१. मणिपूर विभेदकं रुद्रस्तोत्रम्

प्रत्येक साधना के मार्ग में 'योगसिद्धि' सर्वातिशायी उपकरण है। इससे साधना मार्ग की सफलता निश्चित होती है और मानव के लिए यह साधनां हितावह होती है। प्रस्तुत स्तोत्र मणिपूर चक्र के भेदन में सहायक है। योग शास्त्रों के अनुसार शरीर में छह चक्रों में विभिन्न तत्त्वों का स्थायी निवास होता है। इन षट्चक्रों में से 'मणिपूर चक्र' में अन्य तत्त्वों के साथ-साथ अमृत तत्त्व की भी स्थिति मानी जाती है। इस चक्र

के अधिपति देव **'लाकिनीश मृत्युञ्जय'** हैं। उनकी कृपा होने पर चक्र-भेदन एवं अमृत प्राप्ति सहज सम्भाव्य है। अतः इसका पाठ करने से मनुष्य देवत्व को प्राप्त होता है। रुद्रयामल के ४७वें पटल में २३७-३८ संख्यक श्लोकों में इसकी फलश्रुति इस प्रकार बताई गई है—

एतत्स्तोत्रं पठित्वा, स्तौति यः परमेश्वरम्।
याति रुद्रकुलस्थानं, मणिपूरं विभिद्यते॥
एतत्स्तोत्र प्रपाठेन, तुष्टो भवति शंकरः।
खेचरत्वपदं नित्यं, ददाति परमेश्वरः॥

'इस स्तोत्र के पाठ द्वारा जो व्यक्ति परमेश्वर की स्तुति करता है, वह मणिपूर का भेदन कर रुद्रकुल को प्राप्त होता है। इस स्तोत्र के पाठ मात्र से शंकर जी प्रसन्न होते हैं और साधक को देवत्व प्रदान करते हैं।'

स्तोत्र का मूल पाठ निम्नलिखित है। इसमें पाप-निवारण व अमृत-प्राप्ति के लिए ३१ नामों का संकलन किया गया है—

ॐ नमः परमकल्याण नमस्ते विश्वभावन।
नमस्ते पार्वतीनाथ उमाकान्त नमोऽस्तु ते॥१॥
विश्वात्मनेऽविचिन्त्याय गुणाय निर्गुणाय च।
धर्माय ज्ञानमक्षाय नमस्ते सर्वयोगिने॥२॥
नमस्ते कालरूपाय त्रैलोक्यरक्षणाय च।
गोलोकघातकायैव चण्डेशाय नमोऽस्तु ते॥३॥
सद्योजाताय देवाय नमस्ते शूलधारिणे।
कालान्ताय च कान्ताय चैतन्याय नमो नमः॥४॥
कुलात्मकाय कौलाय चन्द्रशेखर ते नमः।
उमानाथ नमस्तुभ्यं योगीन्द्राय नमो नमः॥५॥
शर्वाय सर्वपूज्याय ध्यानस्थाय गुणात्मने।
पार्वतीप्राणनाथाय नमस्ते परमात्मने॥६॥

२. रुद्रमृत्युञ्जय स्तोत्रम्

प्रस्तुत स्तोत्र भगवती आनन्दभैरवी ने आनन्दभैरव के आग्रह पर प्रकट किया था। रोगमुक्त होकर साधना के असिमार्ग पर चलने में इसका नित्य पाठ एक सबल सम्बल है।

स्तोत्र पाठः—

ॐ भजामि शम्भुं सुखमोक्षहेतुं रुद्रं महाशक्तिसमाकुलाङ्गम् ।
रौद्रात्मकं चारु हिमांशुशेखरं कालं गणेशं सुमुखाय शंकरम् ॥१॥
मृत्युञ्जययं जीवनरक्षकं परं शिवं परब्रह्मशरीरमंगलम् ।
हिमांशु कोटिच्छविमादधानं भजामि पद्मद्वयमध्यसंस्थितम् ॥२॥
सर्वात्मकं कामविनाशमूलं तं चन्द्रचूडं मणिपूरवासिनम् ।
चतुर्भुजं ज्ञानसमुद्रचाढ्यं पाशं मृगाक्षं गुणसूत्रव्याप्तम् ॥३॥
धरामयं तेजसमिन्दुकोटिं वायुं जलेशं गगनात्मकं परम् ।
भजामि रुद्रं कुललाकिनीगतं सर्वांगयोगं जयदं सुरेश्वरम् ॥४॥
शुक्रं महाभीमनयं पुराणं प्राणात्मकं व्याधिविनाशमूलम् ।
यज्ञात्मकं कामनिवारणं गुरुं भजामि विश्वेश्वरशंकरं शिवम् ॥५॥
वेदागमानामतिमूलदेशं तदुद्भवं भद्रहितं परापरम् ।
कालान्तकं ब्रह्मसनातनप्रियं भजामि शम्भुं गगनाधिरूढ़म् ॥६॥
शिवागमं शब्दमयं विभाकरं भास्वत्प्रचण्डानलविग्रहं ग्रहम् ।
ग्रहस्थितं ज्ञानकरं करालं भजामि शम्भुं प्रकृतीश्वरं हरम् ॥७॥
छायाकरं योगकरं सुखेन्द्रं मत्तं महामत्तकुलोत्सवाढ्यम् ।
योगेश्वरं योगकलानिधिर्विधि विधानवक्तारमहं भजामि ॥८॥
हेमाचलालंकृतशुद्धवेशं वराभयादाननिदानमूलम् ।
भजामि कान्तं वनमालशोभितं चामूलपद्मामलमालिनं कुलम् ॥९॥
स्वयं पुराणं पुरुषेश्वरं गुरुं मिथ्यामयाह्लादविभाविनं भजे ।
भावप्रियं प्रेमकलाधरं शिवं गिरीश्वरं चारुपदारविन्दम् ॥१०॥
ध्यानप्रियं ज्ञानगभीरयोगं भाग्यास्पदं भाग्यसमं सुलक्षणम् ।
शूलायुधं शूलविभूषितांगं श्रीशंकरं मोक्षफलप्रियं भजे ॥११॥
नमो नमो रुद्रगणेभ्य एवं मृत्युञ्जयेभ्यः कुलचञ्चलेभ्यः ।
शक्तिप्रियेभ्यो विजयादिभूतये शिवाय धन्याय नमो नमस्ते ॥१२॥
बाह्यं त्रिशूलं वरसूक्ष्मभावं विशालनेत्रं तनुमध्यगामिनम् ।
महाविपद्दुःखविनाशबीजं प्रज्ञादयाकान्तिकरं भजामि ॥१३॥
पुरान्तकं पूर्णशरीरिणं गुरुं स्मरारिमाद्यं निजतर्कमार्गगम् ।
अनादिदेवं दिविदोषघातिनं भजामि पञ्चाक्षरपुण्यसाधनम् ॥१४॥
दिगम्बरं पद्ममुखं करस्थं स्थितिक्रियायोगनियोजनं भवम् ।
भावात्मकं भद्रशरीरिणं शिवं भजामि पञ्चाननमर्कवर्णम् ॥१५॥

मायामयं पंकजदामकोमलं दिग्व्यापिनं दण्डधरं हरेश्वरम् ।
त्रिपक्षकं त्र्यक्षरबीजभावं त्रिपद्ममूलं त्रिगुणं भजामि ॥१६॥
विद्याधरं वेदविधानकार्यं कायागतं नीतिनिनादतोषम् ।
नित्यं चतुर्वर्गफलादिमूलं वेदादिसूत्रं प्रणमामि योगम् ॥१७॥
वेदान्तवेद्यं कुलशास्त्रविज्ञं क्रियामयं योगसुधर्मदानम् ।
भक्तेश्वरं भक्तिपरायणं वरं भक्तं महाबुद्धिकरं भजाम्यहम् ॥१८॥
गतागतं गम्यमगम्यभावं समुल्लसत्कोटिकलावतंसम् ।
भावात्मकं भावमयं सुखासुखं भजामि भर्गं प्रथमारुणप्रभम् ॥१९॥
बिन्दुस्वरूपं परिवादवादिनं मध्याह्न सूर्यायुतं सन्निभं नवम् ।
विभूतिदानं निजदानदानं दानात्मकं तं प्रणमामि देवम् ॥२०॥
कुम्भापहं शत्रुनिकुम्भघातिनं दैत्यारिमीशं कुलकामिनीशम् ।
प्रीत्यान्वितं चिन्त्यमचिन्त्यभावं प्रभाकराह्लादमहं भजामि ॥२१॥
त्रिमूर्तिमूलाय जयाय शम्भवे हिताय लोकस्य वपुर्धराय ।
नमो भयाच्छिन्नविघातिने पते नमो नमो विश्वशरीरधारिणे ॥२२॥
तपः फलाय प्रकृतिग्रहाय गुणात्मने सिद्धिकराय योगिने ।
नमः प्रसिद्धाय दयातुराय, वाञ्छाफलोत्साह विवर्धनायते ॥२३॥

शिवममरमहान्तं पूर्णयोगाश्रयन्तं
धरणिधरकराब्जैर्वर्धमानं त्रिसर्गम् ।
विषममरणघातं मृत्युपूज्यं जनेशं
विधिगणपतिसेव्यं पूजये भावयामि ॥२४॥

इस स्तोत्र का नित्य प्रति पाठ करने से साधना के मध्य में रोगादि विकार नहीं सताते हैं। इसमें शिव की स्तुति सुख एवं मोक्ष के लिए की गई है। नमनात्मक स्तुतिपरक यह स्तवन सद्यःफलद है। यदि मणिपूर में हो कुम्भक करके इसका पाठ किया जाए तो साधक जीवन्मुक्त हो जाता है।

३. रुद्रयामलोक्तं महामृत्युञ्जयस्तोत्रम्—

प्रस्तुत स्तोत्र २५ श्लोकों का है। यह भैरव व देवी के संवाद रूप में बताया गया है। इसके नित्य प्रति पाठ से वैभव, रोगनाश, शत्रु-विजय, मुकदमे या विवाद में जीत, पदप्राप्ति आदि उत्कृष्ट फल मिलते हैं। यह एक तान्त्रिक स्तोत्र है। मन्त्र-यन्त्रविधानगर्भित इस स्तोत्र का पाठ विनियोग, न्यास, ध्यान व मानसी पूजा के पश्चात् करना चाहिए।

प्रथम पांच श्लोकों में स्तोत्र कथन की भूमिका बताई गई है। पश्चात् स्तोत्र के छन्द, ऋषि, देवता व ध्यान के तीन पद्य हैं। यह विवरण कुल १० श्लोकों में बताया गया है। शेष १५ श्लोकों में मूल पाठ व फलश्रुति है। इस स्तोत्र के भैरव ऋषि, गायत्र छन्द, महामृत्युञ्जयदेवता, प्रणव बीज, शक्ति शक्ति हैं। विनियोगादि यहां बताए जा रहे हैं।

विनियोगः—अस्य श्री महामृत्युंजय स्तोत्रमंत्रराजस्य भैरव-ऋषिः गायत्रछन्दः महामृत्युंजयो देवता प्रणवो बीजं शक्तिः शक्तिः हृज्ञं कीलकं सूर्यो दिग्बन्धनं श्रीमहामृत्युंजयप्रीतिपूर्वकं भोगापवर्ग सिद्ध्यर्थे पाठे विनियोगः।

न्यासविधिः—भैरव ऋषये नमः शिरसि, गायत्र छन्दसे नमः मुखे, महामृत्युंजयो देवतायै नमः हृदये, प्रणव बीजाय नमः गुह्ये, शक्ति शक्तये नमः पादयोः, हृज्ञ कीलकाय नमः नाभौ, विनियोगाय नमः सर्वांगे।

पश्चात् 'ॐ जूं सः' इन बीज मन्त्रों से करन्यास व षडंगन्यास कर निम्नलिखित ध्यान करें।

ध्यानम् :—

चन्द्रार्काग्निविलोचनं स्मितमुखं पद्मद्वयान्तः स्थितं,
मुद्रापाशसुधाक्षसूत्रविलसत्पाणी हिमांशुप्रभम्।
कोटी चन्द्रगलत् सुधाद्भुततनुं हारादिभूषोज्ज्वलं,
भ्रान्त्या विश्वविमोहनं पशुपतिं मृत्युञ्जयं भावये ॥१॥
पीयूषांशुसुधामणिः करतले पीयूषकुम्भं वहन्,
पीयूषद्युतिसम्पुटान्तरगतः पीयूषधाराधरः।
मां पोयूषमयूखसुन्दरवपुः पीयूषलक्ष्मीसखा,
पीयूषद्रववर्षणस्त्वहरहः प्रीणातु मृत्युञ्जयः ॥२॥
देव दिनेशाग्नि शशांकं नेत्रं, पीयूषपात्रं कलशं दधानम्।
दोर्भ्यां सुधांशुद्युतिमिन्दुचूडं, नमामिमृत्युञ्जयमादिदेवम् ॥३॥

ध्यान करने के पश्चात् मानसोपचार पूजा अथवा संक्षिप्त पूजा करके वक्ष्यमाण स्तोत्र का पाठ करना चाहिए।

मूल पाठः—

चन्द्रमण्डलमध्यस्थं रुद्रं भालेऽतिविस्तृते।
तत्रस्थं चिन्तयेत् साध्यं मृत्युं प्राप्तोऽपि जीवति ॥१॥
मात्राद्यं मातृकामौलिं वेदकल्पतरोः फलम्।
यो जपेत् स भवेद् विश्ववैभवास्पदमीश्वरि ॥२॥
कूर्चं बीजं कुलाचारविचारकुशलः शिवः।
यो जपेत्तस्य वक्त्राब्जे नरीर्नति हि भारती ॥३॥
देवे शाकाशबीजान्ते बिन्दु बिम्बेन्दुमण्डितम्।
चिन्तयेद् यो विभो चित्ते स शिवाद्वयतां लभेत् ॥४॥
हस्‌विसर्गं भृगुं भर्गं सर्वप्रलयकारणम्।
निसर्गतो भजेद् योऽन्तर्लीयते स परे पदे ॥५॥
लक्ष्मीशब्दाक्षरं बिन्दुभूषणं यो जपेत्तव।
करे लक्ष्मीर्मुखे वाणी तस्य शम्भो रणे जय ॥६॥
पालयेति युगं देव! यो जपेद् बीजसन्निधौ।
स सार्वभौमं साम्राज्यं भजेदन्ते स लोकताम् ॥७॥
शरवं वरदां वीर माधवीं सविसर्गकाम्।
जपेद् यः शरदम्भोधधवलं तद् वशी भ्रमेत् ॥८॥
आकाशबीजं साकाशं जपेद् यः कुशसंस्तरे।
सकौलिक शिरो रत्नरञ्जितांघ्रि युगो भवेत् ॥९॥
शंकाबीजं सरेफस्कं शम्भो पद्मासने जपेत्।
कंकालमालाभरणे भविता भैरवोपमः ॥१०॥
हृज्ज्ञबीजं जगद्‌बीजं तेजोरूपं च यो जपेत्।
तस्मै दास्यामि भो शम्भो! निजं धाम सनातनम् ॥११॥
अकारं साकारं गिरीश! तव मन्त्राञ्चलगतं,
जपेद्यो हृत्पद्मे निरुपमपरानन्द मुदितः।
स साम्राज्यं भूमौ भजति रजनीनायककला-
लसन्मौलिप्रान्ते व्रजति शिवसायुज्यपदवीम् ॥१२॥
बिन्दुभूषणत्रिकोणसार - स्वारणस्फुरदजारत्रिवृत्ते।
भूगृहाद्यमिति चक्रमण्डले त्वां निषण्णमुषसि स्मराम्यहम् ॥१३॥
नानाविधानर्घ्य विभूषणाढ्यं, निःशेषपीयूषमयूखबिम्बे।
निषण्णमीशानम शेष शेष,वाणीनुतं मृत्युहरं नमामि ॥१४॥

इति स्तोत्रं दिव्यं सकलमनु राजैकनिकषं,
पठेद् यः पूजान्ते शिव ! शिवगृहे वार्चनविधौ ।
रणे जित्वा वैरान् भजति नृपलक्ष्मीं स्वमहसा,
भवेदन्ते वीरः सकलसुरसेव्यः शिवमयः ॥१५॥

४. सिद्धकुञ्जिका स्तोत्रम्—

रुद्रयामल में इस स्तोत्र की बड़ी प्रशंसा की गई है। सप्तशती का पाठ इसके बिना पूर्ण नहीं माना जाता। स्वतन्त्र रूप से इसका पाठ करने से मारण, मोहन, वशीकरण, स्तम्भन, उच्चाटन आदि सभी सम्भव हैं। नित्य प्रति पाठ करने से असाध्य साधन होता है। इस स्तोत्र को भगवान् शिव ने बनाया है। चण्डी (सप्तशती) पाठ के अंगरूप में व स्वतन्त्र विधि से इसका पाठ करने से सद्यः फल मिलता है। इसके विषय में कहा गया है कि इसका एक स्वतन्त्र पाठ चण्डी के सम्पूर्ण पाठ का फल देने में समर्थ है।

'कुञ्जिकापाठ मात्रेण दुर्गापाठफलं लभेत्।'

इसका सम्पूर्ण पाठ बताया जा रहा है।

महामाया का ध्यान करके श्रद्धापूर्वक इसका पाठ करना चाहिए। प्रथम चार श्लोकों में शिव-गौरी के संवाद रूप में इसका माहात्म्य बताया गया है।

स्तोत्र पाठः—

शिव उवाच

शृणु देवि ! प्रवक्ष्यामि कुञ्जिका स्तोत्रमुत्तमम् ।
येन मन्त्रप्रभावेण चण्डीजापः शुभो भवेत् ॥१॥
न कवचं नार्गला स्तोत्रं कीलकं न रहस्यकम् ।
न सूक्तं नापि ध्यानं च न न्यासो न च वार्चनम् ॥२॥
कुञ्जिकापाठमात्रेण दुर्गापाठफलं लभेत् ।
अति गुह्यतरं देवि देवानामपि दुर्लभम् ॥
गोपनीयं प्रयत्नेन स्वयोनिरिव पार्वती ! ।
मारणं मोहनं वश्यं स्तम्भनोच्चाटनादिकम् ॥
पाठमात्रेण संसिद्ध्येत् कुञ्जिकास्तोत्रमुत्तमम् ॥४॥

॥ अथ मन्त्रः ॥

ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे ॥ ॐ ग्लौं हुं क्लीं जूं सः ज्वालय ज्वालय ज्वल ज्वल प्रज्वल प्रज्वल ऐं ह्रीं चामुण्डायै विच्चे ज्वल हं सं लं क्षं फट् स्वाहा ।

॥ इतिमन्त्रः ॥

नमस्ते रुद्र रूपिण्यै नमस्ते मधुमर्दिनि ।
नमः कैटभहारिण्यै नमस्ते महिषमर्दिनि ॥
नमस्ते शुम्भ हन्त्र्यै च निशुम्भासुरघातिनि ।
जाग्रतं हि महादेवि जपं सिद्धं कुरुष्व मे ॥
ऐंकारी सृष्टिरूपायै ह्रींकारी प्रतिपालिका ॥
क्लींकारी कामरूपिण्यै बीजरूपे नमोऽस्तु ते ।
चामुण्डा चण्डघाती च यैकारी वरदायिनी ॥
विच्चे चाभयदा नित्यं नमस्ते मन्त्ररूपिणि ॥५॥
धां धीं धूं धूर्जटेः पत्नी वां वीं वूं वागधीश्वरी ।
क्रां क्रीं क्रूं कालिकादेवी शां शीं शूं मे शुभं कुरु ॥६॥
हुं हुं हुंकाररूपिण्यै जं जं जं जम्भनादिनी ।
भ्रां भ्रीं भ्रूं भैरवी भद्रे भवान्यै ते नमो नमः ॥७॥
अं कं चं टं तं पं यं शं वीं दुं ऐं वीं हं क्षं
धिजाग्रं धिजाग्रं त्रोटय त्रोटय दीप्तं कुरु कुरु स्वाहा ॥
पां पीं पूं पार्वती पूर्णा खां खीं खूं खेचरी तथा ॥८॥
सां सीं सूं सप्तशती देव्या मन्त्रसिद्धिं कुरुष्व मे ॥
इदं तु कुञ्जिकास्तोत्रं मन्त्रजागर्ति हेतवे ।
अभक्ते नैव दातव्यं गोपितं रक्ष पार्वति ॥
यस्तु कुञ्जिकया देवि ! हीनां सप्तशतीं पठेत् ।
न तस्य जायते सिद्धिररण्ये रोदनं यथा ॥

श्लोकों का क्रम व तत्संख्या इसी प्रकार से कही गई है। स्तोत्र में नमस्कारात्मक पद्धति से भगवती के राक्षस संहारी रूप की स्तुति है। पश्चात् बीजाक्षरों में सृष्टि-स्थिति-कामात्मक त्रितयत्व का स्वरूप मानकर सर्वत्र नमस्कारात्मक प्रयोग किया है। पश्चात् अक्षरात्मक एवं विभिन्न बीजमन्त्रात्मक प्रयोग हैं और अन्त में इसे मन्त्र जागरण का हेतु बताते हुए अभक्त य अश्रद्धालु को न देने का निर्देश है।

५. बटुक भैरव तन्त्र साधना

भैरव को रुद्र रूप माना जाता है। ये सद्यः सिद्धिप्रद हैं। जहां अन्य देवता दीर्घकाल की साधना के बाद ही कदाचित प्रसन्न होते हैं, भैरव तुरन्त फल देते हैं। शिवागम सार में बटुक भैरव नाथ के विषय में ऐसा ही कहा गया है—

अन्ये देवास्तु कालेन प्रसन्ना सम्भवन्ति हि।
बटुकः सेवितः सद्यः प्रसीदति ध्रुवं शिवे॥

पीछे भैरवोपासना के सन्दर्भ में पृ० १३१ पर श्री बटुक भैरव नाथ जी का मूलमन्त्र 'ॐ ह्रीं बटुकाय आपदुद्धारणं कुरु कुरु बटुकाय ह्रीं ॐ' बताया गया है। वहीं पर जप विधि भी लिखी गई है। उसी प्रकार इस मन्त्र का जप विधिपूर्वक करने से 'दिनभेद से' फलभेद भी रुद्रयामल में बताया गया है। इस मन्त्र का कामनाभेद से जप करने पर षटकर्म सिद्धि होती है। ये प्रयोग एक दिन में ही सम्पन्न हो जाते हैं।

एकदिवसीयप्रयोगाः—मूल मन्त्र का १०००० जप **रविवार** को प्रातःकाल श्मशान में जाकर करें। उसी दिन अर्धरात्रि में जायफल, जावित्री व कनेर पुष्प मिश्रित घी से १००० आहुतियां देने से शत्रु का स्तम्भन या कामना भेद से क्रिया स्तम्भन होता है।

दोपहर के समय कुएँ के जल से स्नान कर **सोमवार** के दिन गूणी में बैठकर मूलमन्त्र का पूर्वोक्त जप करें। पश्चात् भैंस के घी में दही चीनी मिलाकर दशांश हवन कर भस्म से तिलक करें। जो भी देखेगा वही वशीभूत हो जाएगा।

मंगलवार को अर्धरात्रि में चौराहे पर १०,००० जप करके घी, खीर, लाल चन्दन व औरत के बाल मिलाकर १००० आहुतियां देने से परम भयंकर शत्रु भी नाश को प्राप्त हो जाएगा।

बुधवार को सूर्यास्त से डेढ़ घंटा पहले से ही किसी शून्य आगार में मूल मन्त्र का उक्त संख्यक जप कर घी, खांड, कनेर पुष्प व बेल फल मिलाकर दशांश हवन करने से आकर्षण होता है।

गुरुवार को सूर्योदय के समय नदी किनारे जप करके घी, आंवला व बेल से दशांश हवन करने से वशीकरण होता है।

शुक्रवार को सायंकाल वटवृक्ष के नीचे जप कर घी, दूध, दही,

गन्ने का रस, गो मूत्र व खीर मिलाकर दशांश हवन करने से शत्रु का उच्चाटन होता है।

इन सभी विधानों में जप संख्या १०,००० व हवन संख्या १००० है। स्थान भेद व हवनीय सामग्री में भेद है। रुद्रयामल में इन्हें एकदिवसीय षट्कर्मप्रयोग कहा गया है। बटुक भैरव नाथ की विस्तृत साधना व सिद्धि हमारी 'श्री बटुक भैरव साधना' पुस्तक में देखें। किसी भी साधना में विनियोग, न्यास, ध्यानादि करने से व जपान्त में स्तवन करके अपराध क्षमापन से सहायता मिलती है। जप के समय माला प्रार्थना भी करनी चाहिए। साधक को सदैव शुद्ध मन से एवं भावना शुद्ध रखते हुए आत्म कल्याण या विश्व कल्याण की इच्छा से साधना में लगना चाहिए। दुर्भावना एवं तामसी वृत्ति से की गई साधना आत्मघातक हो सकती है। साधना के मध्य व पहले परान्न भक्षण, दान लेना, मांस स्पर्श आदि से दूर रहकर आहार सत्त्व व मन की शुद्धि रखनी चाहिए।

जिह्वा दग्धा परान्नेन हस्तौ दग्धौ परिग्रहात्।
परस्त्रीभिर्मनोदग्धं मन्त्रसिद्धिः कथं भवेत्॥

किसी भी क्रिया अथवा प्रयोग को करने में प्रत्येक साधक को यह नहीं भूलना चाहिए कि—'हम जिस भवन में प्रवेश कर रहे हैं उसकी पात्रता प्राप्त करके क्रमशः एक-एक सोपान पर चढ़ते हुए अन्तिम शिखर तक पहुंचने का प्रयास करें। उड़कर अथवा छलांग लगाकर पहुंचने का प्रयास सफल नहीं होता।'

शान्त्यै श्रिये सात्त्विक-साधनायै,
लोकोपकाराय च नित्यमेव।
यः साधनायां स्व-मनो नियुङ्क्ते,
प्राप्नोति सोऽत्र स्वतपःफलानि॥

लेखक परिचय एवं शुभाशंसा

'नौसालपुर-थण्या'स्थाः शेखावाटी-समीपगाः ।
पूर्वजा यस्य दुष्काल-प्रभावान्मेड़तां श्रिताः ॥१॥
ततो 'नन्दावता'ग्रामे मालवेषु समागताः ।
पण्डिता 'राम'नामनो ज्योतिःशास्त्र-विचक्षणाः ॥२॥
मानो-खुशाल-लालाजी-चौखा-दौराजि-संज्ञकाः ।
तत्पुत्राः क्रमशस्तत्र लेभिरे जनिमुत्तमाम् ॥३॥
पण्डितस्तेषु दौराजीरवाप तनयत्रयीम् ।
धनराजस्तेषु वैदुष्यात् प्रतापगढ़-भूपतेः ॥
सम्मानं प्राप्य तत्रैव चकार वसतिं निजाम् ।
राजस्थानस्य तद्राज्ये 'प्रतापगढ़'नामके ॥४-५॥
पुत्रस्तद् भगवानजीतिविबुधो ज्योतिर्विदामग्रणी-
रासीद् गुर्जरगौड-विप्रतिलको राज्ञा सुसम्मानितः ।
तस्याभूदथ 'नाथुलाल' इति सन्नामा सुतः पण्डितो,
विद्वन्मण्डन-मण्डनो गणकराड् भक्तः शिवाराधकः ॥६॥
'कृष्णलाल-रमाकान्त' नामनौ सत्सुतौ शुभौ ।
अभूतां शास्त्रनिष्णातौ ज्योतिर्विद्या-विचक्षणौ ॥७॥
साहित्यादि-सुशास्त्रवित् कविवरः पञ्चाङ्गकर्ता पटुः
पुत्रैः पञ्चभिरञ्जितो भुवि रमाकान्ताभिधोऽभूत् तयोः ।
तत्पुत्रः प्रथमः कविर्विनयवान् श्रीरुद्रदेवाभिधो,
नानाग्रन्थविधान-वर्धितयशा दैवीं गिरं सेवते ॥८॥
सीताऽम्बा यस्य तातो गणक-गणवरः श्रीरमाकान्तशर्मा,
विप्रः शाण्डिल्यगोत्रो 'दशपुर-भूविजः देववाग्भक्तिनिष्ठः ।
दाक्षायण्याः पदाब्जश्रितवरशरणो 'रुद्रदेवस्त्रिपाठी',
रुद्र-प्रोक्तं प्रशस्तं रुचिरमरचयद् यामलं साररूपम् ॥९॥
इदं हि मन्त्र-यन्त्र-तन्त्र- योग-साधनान्वित,
'समग्र-शास्त्र-विश्वकोश'-शंसनाऽभिशंसितम् ।
विलिख्य रुद्रदेव आपर्यंत् स्वराष्ट्रभाषया,
सुसंकलमभिडते च तद् विभातु 'रुद्रयामलम्' ॥१०॥
कृष्णानन्दाप्तविद्येन रमाकान्ताप्तजन्मना ।
प्रणीतं रुद्रदेवेन भासतां 'रुद्रयामलम् ॥११॥